प्रेर्यन्ते ऽमी परमररयो हर्म्यवातायनानां (*ad* ii. 2, 17 = *Kapphiṇābhy*. xv. 13; also cited by Sarvānanda).

(तल्वे तत्त्वार्थे) रवावद्वा (*ad* iii. 4, 12 = the passage quoted by Śeṣagiri from xviii. 35 as तत्त्वे सत्त्वे नवाह्वा ?).

Liṅga Bhaṭṭa's commentary on the same (see Śeṣagiri, loc. cit., p. 33).

Śubhaṃkara (sometimes Śubhāṅka. Aufrecht, Z.D.M.G. xxxvi, pp. 546–7; C.C. i, p. 659. No information. A Buddhist author also bore the same name, see Thomas, *Deux Collections . . . de Sādhanas*, Muséon, 1903, index; Aufrecht mentions C.C. iii, p. 157, after Haraprasāda Śāstrin's *Report*, 1895–1900, p. 10, a Śubhaṃkara, author of a work entitled *Hastamuktāvalī*, on dancing).

21 को ऽयं द्वारि हरिः (**Skm*. i. 277, etc.).

**Skm.* एते लक्ष्मण जानकी (i. 263 = **Padyāv*. 148 and 250, शुभाङ्कस्य; given with translation by Aufrecht in the article cited; Hemac., p. 90 anon.).

ये गोवर्धनमूल (i. 293 = **Padyāv*. 3, शुभाङ्कस्य).

वत्से माधवि तात (iii. 227, शुभाङ्कस्य).

*_Padyāv._ (in addition to Nos. 3, 148, 250 above).

दूरं दृष्टिपथात्तिरोभव (265, शुभाङ्कस्य = *_Skm._ i. 299, कस्यचित् ).

ŚUBHĀṄGA (once named as _Śubhāṅka,_ and therefore perhaps identical with ŚUBHAṂKARA).

71 प्रागेव शैवमस्त्रं.

*_Skm._ उत्कण्ठाकुलचक्रवाक (ii. 708).
कार्पासास्थिप्रचय (iii. 82).
दुर्वारकेलिकलङ्किम (v. 19).
परिचुम्बनाय घटते (ii. 419 ; MS. B. शुभाङ्कस्य).
विलेभ्यो निष्क्रान्तं प्रति (v. 20).
माषीणां मुषितं (ii. 881).
यद्वीचिभिः स्पृशसि गगनं (iv. 53 = _Śp._ 1090, गौडाभिनन्दस्य ; *_S.-Ratnak._ iii. 216 anon.; see p. 21).
विश्रामं भज तालवृन्त (ii. 857).
विषयपतिरलुब्धो (v. 186).
व्योमन्युल्कोत्थरणे (iii. 114).

ŚṚṄGĀRA (Aufrecht, C.C. i, p. 660. No information).

269 कल्याणं परिकल्प्यतां.
271 लावण्येन पिधीयते (*_Skm._ ii. 142).
272 सोद्वेगा मृगलाञ्छने (*_Skm._ ii. 172).

*_Skm._ (in addition to the above).

पक्षाभ्यां सहितौ प्रसार्य चरणाव् (v. 25).

ŚRĪKAṆṬHA (? = ŚRĪKAṆṬHA PAṆḌITA, who "mentions a king Śrī-Malla Deva"; Aufrecht, Z.D.M.G. xxvii, p. 93 ; C.C. i, p. 667).

56 मलयमहीधरपवनः.

*_Skm._ कलाधारो वक्रः (i. 415).
भूर्भूपालचमूपदेषु (iii. 130).
विष्वग्विसारिततिमिरावरुद्ध (i. 7).
श्रीमान् पातालकुक्षिंभरि (iii. 235).

_Śp._ णूनं वादल छाइ खेह (550, श्रीकण्ठपण्डितस्य, _v. supra_).

Śrīdharanandin (Aufrecht, C.C. i, p. 669. No information).

7 कारुण्यामृतकन्दली (*Skm. i. 243).

8 शीलाम्भःपरिषेकशीतल॰ (*Skm. i. 244).

*Skm. (i. 243–4, as above).

Siddhoka (Aufrecht, C.C. i, p. 722. No information).

441 आदृष्टिप्रसरात्प्रियस्य (*Skm. ii. 290 ; Amaru, 76, etc.).

*Skm. (this verse only).

Saṃghaśrī (Aufrecht, C.C. i, p. 687. No information; a Buddhist author).

4 कामक्रोधौ द्वयमपि यदि (*Skm. i. 241).

54 आरक्ताङ्कुरदन्तुरा (*Skm. ii. 761).

*Skm. i. 241, ii. 761, as above.

Sāvarṇi (no information).

79 श्रोण्यां चित्रः कुरवकगुणः.

Surabhi (Aufrecht, C C. i, p. 729. No information : ? = Surabhi Cūla, C.C. i, p. 729 ; Peterson, op. cit., p. 134).

307 मुञ्चत्रीडावत्याः.

*Skm. अयं दूरभ्रान्तः पटुतर (iv. 202).

आसीद्यस्तव पुच्छक (iv. 278).

उच्चैर्वृतो हरिपदे (i. 435).

एतत्कवीन्द्रमुखचन्द्र (v. 157).

एतैर्जह्नुसुताजलैर् (i. 384).

गर्भक्लान्तिभरालसां (iv. 226).

गाङ्गमम्बु शुभम॰(सितम॰) (iv. 337 = *Sāhityad.*, p. 338 anon. ; *Kāvyapr. ad* x. 52 anon. ; *Śp.* (one MS.) after 796 ; *As.*, p. 171 anon. ; **Sūktiratn.* 503 anon. ; **Padyatar.* 33 anon. ; **Sāras.* iv. 76 anon.).

त्वङ्गद्वैरिकरीन्द्र (iii. 181).

निद्रानन्दकरीर्नितान्त (i. 338).

प्रालेयाम्भःशिशिर (ii. 709).

महानीलश्यामं (i. 391).

लीलालोलकराङ्गुली (iii. 259).

शौर्योत्कर्षतृणीकृत (i. 226).

SUVARṆAREKHA (Aufrecht, C.C. i, p. 729. No information).

164 तरलनयना तन्वङ्गी.

*Skm. मर्यादाभङ्गभीतेर्° (iv. 40 = *S.-Samcaya, ix. 12).

Ujjvaladatta *ad Uṇādisūtra*.

पुंसः स्त्रियां स्त्रियाः पुंसि संभोगं प्रति या स्पृहा ।
स शृङ्गार इति ख्यातः क्रीडारत्यादिकारकः ॥
(*ad* ii. 136, इति सुवर्णरेखः, a lexicographer ?).

SONOKA (? = SEHNOKA, SOHNOKA, SOLLOKA, SOLŪKA; see following name. Aufrecht, C.C. i, pp. 734, 737. No information).

305 नाधन्यान्विपरीत° (*Skm. ii. 667, सोल्लोकस्य).

*Padyāv. सचासार्त्ति यशोदया (262, साह्लाकस्य = Krs. 42, सोन्नोकस्य, etc.; see SONNOKA).

SONNOKA (see preceding name. No information).

41 . . . धेनुदुग्धकलशानादाय.

42 सचासार्त्ति यशोदया (*Skm. i. 296, सोल्लोकस्य; *Padyāv. 262, सोह्लोकस्य).

47 देवो हरिर्जयति यज्ञवराहरूपः.

345 तल्पे चम्पककल्पिते.

398 अयं धूर्तो मायावि° (*Skm. ii. 117, सोल्लोकस्य).

399 अप्राप्तकेलिसुखयोर्.

480 भ्रश्यद्विवचितमसंफलद् (*Skm. ii. 459, सोल्लोकस्य).

*Skm. अयं धूर्तो . . . (ii. 17; see above).
इयं गौरेका नः (v. 168, सेह्लकस्य).
उच्छन्नच्छदिरुल्लसद्वृति (v. 249, सोह्लोकस्य).
उत्पुच्छप्रमदोल्लसद् (v. 35, सोल्लोकस्य).
प्रसरति तिमिरः सवितुर् (i. 364, सेह्लोकस्य).
भ्रश्यद्विवचित . . . (ii. 459; see above).
विद्वानघरनष्टधीर्° (i. 342, सोलूकस्य).
सचासार्त्ति . . . (i. 296; see above).

HARṢA DEVA (seventh century, author of the *Ratnāvalī*, etc., and patron of Bāṇa, Mayūra, and others; Aufrecht, Z.D.M.G. xxvii, p. 98; C.C. i, p. 764; Peterson, op. cit., p. 138; *J. As. Soc. Bombay*, xvi, p. 179; Bhandarkar, *Report*, 1897, pp. xx, li. Often confused with Śrīharṣa).

159 = *Ratnāv.* ii. 9 (35).

[217 anon. = *Nāgān.* iii. 4 (35).]

224 = *Ratnāv.* ii. 10 (36).

352 एकत्रासनसंस्थितिः (श्रीहर्षस्य = Amaru, 18, etc.).

[422 anon. = *Ratnāv.* ii. 12 (38).]

517 = *Ratnāv.* iii. 9 (55).

**Skm.*

| *Ratnāv.* | **Skm.* | *Priyadarśikā.* | **Skm.* |
|---|---|---|---|
| i. 1 | = i. 115. | i. 1 | = i. 114. |

| *Nāgān.* | **Skm.* |
|---|---|
| i. 8 | = v. 36, श्रीहर्षस्य. |
| ii. 8 (27) | = ii. 466, प्रभाकरदत्तस्य. |
| iii. 4 (35) | = ii. 41. |

Also—

आवक्रेन्दु तदाङ्गमेव (iii. 27, श्रीहर्षस्य).
एकं योगनियोजनाय (i. 70).
ये कारुण्यपरिग्रहाद् (v. 182, श्रीहर्षस्य).
शम्भो सत्यमिदं पयोधि (i. 117).

**Sml.*

| *Ratnāv.* | **Sml.* | *Ratnāv.* | **Sml.* |
|---|---|---|---|
| i. 6 | = P. 161*a*. | ii. 13 | = B. 64*b*. |
| 16 | = B. 142*b*. | 14 | = B. 64*a* (P. 59*a*). |
| 17 | = B. 111*a*. | 20 | = B. 103*a*. |
| 19 | = B. 130*a* (P. 104*a*). | iii. 1 | = B. 74*b*. |
| 20 | = B. 129*b*. | 3 | = B. 71*b*. |
| 21 | = B. 139*b*. | 6 | = B. 133*b* (P. 107*a*). |
| 25 | = B. 129*b*. | 11 | = B. 107*a* (P. 86*a*). |
| ii. 7 | = B. 69*b*. | 12 | = B. 143*a*. |
| 8 | = B. 84*b* (P. 72*a*). | 13 | = B. 143*a*. |
| 9 | = B. 93*b*. | 14 | = B. 106*b*. |
| 10 | = B. 85*b*. | 15 | = B. 137*b*. |
| 12 | = B. 64*b*. | | |

| *Nāgānanda.* | **Sml.* | *Nāgānanda.* | **Sml.* |
|---|---|---|---|
| i. 8 | = B. 179*b*. | i. 10 | = B. 191*b*. |
| iii. 12 (43) | = B. 143*a*. | iv. 3 (52) | = B. 180*b*. |
| i. 1 | = B. 20*a*. | | |

Also— सरस्यामेतस्यां (P. 72*b* = *Kkbh.* चक्रपालस्य).

**Sabhyāl* (in addition to a number of verses from the *Naiṣadhīya*).

| *Ratnār.* | **Sabhyāl.* | *Nāgān.* | **Sabhyāl.* |
|---|---|---|---|
| i. 24 | = A 16*b*. | iii. 4 (35) | = A 19*a*. |

**S-Hārār.*

| *Ratnār.* | **S.-Hārār.* | *Ratnār.* | **S.-Hārār.* |
|---|---|---|---|
| i. 6 | = 64*b*, 714. | ii. 12 | = C 369. |

**Padyāmṛtat.* संधानानि विसंधयः (ii. 2, श्रीहर्षस्य = **Sml. P.* 139*b*, श्रीहर्षपण्डितस्य).[1]

*Sbhr.*

| *Ratnār.* | *Sbhr.* | *Ratnār.* | *Sbhr.* |
|---|---|---|---|
| i. 24 | = 1962. | iii. 2 | = 1206. |
| ii. 9 | = 1513. | 6 | = 1908. |
| 14 | = 1078. | 9 | = 2058. |
| 19 | = 1602. | iv. 2 | = 1281. |

| *Nāgān.* | *Sbhr.* | *Nāgān.* | *Sbhr.* |
|---|---|---|---|
| i. 18 | = 1205. | iv. 2 (51) | = 540. |
| iii. 4 (35) | = 2072. | 7 (56) | = 3280, कस्यापि. |
| 6 (37) | = 2034 anon. | | |

Also— अग्रयमलोलजिह्वं (233 = *Śp.* 470, कस्यापि).

अमुष्मै चौराय (1979, श्रीहर्षदेवचौरयोः = **Skm.* v. 143, अमरोः; *Siṃhāsanadvātriṃśatikā*, 60; *Bhojapr.* 234; trans. Tawney, *Prabandhacintāmaṇi*, p. 38).

उदयगिरिमूर्धगो ऽयं (2028).

क्षमी दाता गुणग्राही (3228, श्रीहर्षदेवतत्सेवकयोः; 2819, श्रीव्यासमुनेः; *Vetālap.* iv. 6, p. 21; *Hitop.* iii. 137).

---

[1] संधानानि विसंधयः प्रकृतयस्ताभ्यः परः प्रत्ययो
देव व्याकरणाद्भेदकमिदं वैधर्म्यमेतत्तव ।
आदेशो न विकल्पते न च कृतं किंचित्क्वचिल्लुप्यते
नो वृद्धिर्गुणबाधिका न पुरुषः कार्ये क्वचिन्मध्यमः ॥

**तस्या मुखस्यातिमनोहरस्य** (1517, **श्रीहर्षस्य** = *Krs.* 206 anon.).

**यदेतच्चन्द्रान्तर्जल** (1978, **श्रीहर्षदेवचौरयोः** = *Sarasvatīk.* *ad* iv. 51 anon.; *Śp.* 563, Bhoja and a thief; *Sāhityad.*, p. 295 anon.; *Aś.*, p. 51 anon.; *Bhojapr.* 233; **S.-Ratnak.* iv. 78 anon.; **S.-Prab.* 38 anon.; trans. Tawney, *Prabandhacintāmaṇi*, p. 38).

*Śp.*

| *Ratnār.* | *Śp.* | *Ratnār.* | *Śp.* |
|---|---|---|---|
| i. 6 | = 441. | i. 22 | = 3798. |
| 17 | = 3790. | 24 | = 3621. |
| 19 | = 3797. | ii. 12 | = 3401. |

| *Nāgān.* | *Śp.* | *Nāgān.* | *Śp.* |
|---|---|---|---|
| iii. 4 (35) | = 3672. | iii. 12 (43) | = 3656. |

*Aucityar.*

| *Ratnār.* | *Aucityar.* | *Ratnār.* | *Aucityar.* |
|---|---|---|---|
| i. 8 | = *ad* 15. | ii. 4, 2, 3 | = *ad* 16. |
| ii. 12 | = *ad* 11. | | |

*Kkbh.*

| *Ratnār.* | *Kkbh.* |
|---|---|
| iv. 10 | = *ad* v. 1. |

*Suvṛttat.*

| *Ratnār.* | *Suvṛttat.* |
|---|---|
| ii. 7 | = *ad* ii. 19. |

*Daśar.*

| *Ratnār.* | *Daśar.* | *Ratnār.* | *Daśar.* |
|---|---|---|---|
| i. 2 | = *ad* iii. 4 anon. | ii. 17 | = *ad* i. 32. |
| 5 | = *ad* iii. 5. | 19 | = *ad* i. 32. |
| 7 | = *ad* i. 18, 24. | iii. 4 | = *ad* iv. 10. |
| 21 | = *ad* iv. 65. | 6 | = *ad* i. 14. |
| ii. 1 | = *ad* i. 32. | 9–11 | = *ad* i. 36. |
| 2 | = *ad* ii. 54. | 14 | = *ad* i. 37. |
| 3 | = *ad* ii. 54. | iv. 8 | = *ad* i. 43. |
| 4 | = *ad* i. 14. | 14 | = *ad* i. 41. |
| 14 | = *ad* i. 32. | 16 | = *ad* iv. 26. |

| *Nāgān.* | *Daśar.* | *Nāgān.* | *Daśar.* |
|---|---|---|---|
| i. 4 | = *ad* ii. 4 anon. | i. 14 | = *ad* iv. 45 anon. |
| 6 | = *ad* ii. 6. | v. 15 (92) | = *ad* ii. 4, 13. |

| *Sāhityad.* | *Ratnāv.* | *Sāhityad.* | *Ratnāv.* | *Sāhityad.* |
|---|---|---|---|---|
| | i. 2 = | p. 243 anon. | ii. 3 = | pp. 36, 90. |
| | 5 = | p. 131. | 4 = | p. 136. |
| | 46 = | p. 234 anon. | 17 = | p. 152 anon. |
| | ii. 1 = | p. 150. | iii. 11 = | p. 155. |

| *Nāgān.* | *Sāhityad.* | *Nāgān.* | *Sāhityad.* |
|---|---|---|---|
| i. 13 = | p. 189 anon. | iv. 16 (65) = | p. 184. |
| iv. 3 (52) = | p. 249 anon. | v. 15 (92) = | p. 89. |

Arjunavarman *ad* Amaru, 63 = *Ratnāv.* ii. 1.

*Pañcatantra* (Kosegarten), ii. 178 = *Nāgān.* v. 1 (78).

*Śāntiśataka*, ii. 19 = *Nāgān.* iv. 2 (51).

We may note further the following correspondences :—

*Ratnāv.* i. 5 = *Nāgān.* i. 3 = *Priyadarśikā* i. 3.
,, 14 = ,, iii. 10.
,, iv. 1 (50) = ,, 3.

Harṣapāla Deva (no information).

152 आश्चर्यमूर्जितमिदं.

Hiṅgoka (no information).

362 शठान्यस्याः काञ्चीमणि° (**Padyāv.* 261, समाहर्तुः ; Amaru, 109, etc.).

Himāṅga (no information).

178 शृङ्गारद्रुममञ्जरी.

Himboka (Ḍimboka, Bimboka. No information. Aufrecht, C.C. i, pp. 214 and 373 ; Bhandarkar, op. cit., p. xxviii).

369 मया तावद्गोत्रस्खलित° (**Skm.* ii. 197, बिम्बोकस्य).

383 प्रिये मौनं मुञ्च (**Skm.* ii. 243, डिम्बोकस्य).

Concerning Bimboka, see above.

**Skm.* (in addition to the above), six verses (Ḍimboka).

कुलोत्कर्षात्स्नेहात् (ii. 65).

गतं तद्गाम्भीर्यं (iv. 331 = *Sbhv.* 707 anon. ; *Śp.* 810 anon. ; **S.-Samcaya*, xii. 4 anon.).

आने विक्रमवर्धन (iii. 88).

पूरापायप्रकट (ii. 844).

प्रयच्छाहारं मे यदि (ii. 701 = *Krs.* 335 anon.; Amaru, 117).

प्रिये . . . (ii. 243 = *Krs.* 383 above).

***Sml.* (Dimboka).

नायातो यदि तादृशं (B. 83*b* = *Sbhr.* 1438, कस्यापि).

पुरस्तन्व्या गोत्रस्खलन॰ (P. 66*a*, B. 74*b* = ***Skm.* ii. 211, अमरोः; Amaru, 51; *Sbhr.* 1323 anon.; *Daśar. ad* iv. 16, Amaru).

**List of Writers (not included above) to whom verses occurring in the *Kvs.* are attributed in other Works.**

Acaladāsa, 320, **Skm.*; see Acala.
Amṛtadatta, 31, **Skm.*, **Sml. B.*, **Subhāṣ.*, *Sbhr.*
Arbhaka, 379, *Sbhr.*
Bhadanta Ārogya, 408, *Sbhr.*, **Sml. B.* and *P.*
Oṃkaṇṭha, 129, **Skm.*
Kaṅka, 436, **Padyāv.*
Bhaṭṭa Karṇāṭaka, 244, *Sbhr.*
Mālava Kuvalaya, 66, *Aucityav.*
Keśaṭa, 469, **Skm.*
Koṅka, 309, **Skm.*
Kṣemendra, 157, *Śp.*; 310, *Sbhr.*
Goïdhoï Kavirāja, 153, **Sml. P.* and *B.*
Govindasvāmin, 509, *Śp.*
Ghaṇṭaka, 140, *Sbhr.*
Caṇḍālacandra, 274, **Skm.*
Cirantanaśaraṇa, 30, **Skm.*
Jaghanacapalā, 518, **Padyaveṇī*, *Padyarac.*
Dhanada Deva, 246, *Śp.*, **S.-Hārāv.*
Nandana, 277, **Sml. B.*
Nāgamyā, 5, *Śp.*
{Nārāyaṇa, 37, *Sbhr.*
{Niśānārāyaṇa, 37, *Śp.*
{Pulina, 352, *Sbhr.*
{Pulinda, 352, **Sml. P.*
Puṣṭika, 451, *Śp.*
Puṣṭiṃkara, 451, **S.-Hārāv.*
Pracaladāsa, see Acaladāsa.
Bāhvaṭa, see Vākkūṭa.
Bilhaṇa, 436, *Śp.*
Buddhaka, 389, *Sbhr.*
Bhartṛhari, 237 (*Śataka*, i. 11); 245, *Śp.*, **Sabhyāl.*, *Padyarac.*; 255 (*Śataka*, i. 16); 484, *Sbhr.*, **Sml. B.*

Bhāvamiśra, 360, **Sabhyāl.*
Bhāsa, 163, **Sml. P.*
Mahākavi, 323, **Skm.*
Manoka, 393, **Skm.*
Mārjāra, 344, **Skm.*
Mṛgarāja, 478, **Skm.*
Rathāṅga, 200, **Skm.*
Ravigupta, 498, *Sbhr.*
Rājoka, 142, **Skm.*
Rāmila-Somilau, 473, *Śp.*, **Sml. B.*, **Sabhyāl.*
Retoka, 149, 150, **Skm.*
Vararuci, 37, **Skm.*
Vardhuka, 389, **Sml. B.*
Vasuka, 59, **Sml. P.*
Vāgbhaṭa, 372, **Sml. B.*
Vācaspati, 293, **Skm.*
Vātoka, 119, **Skm.*
Vāmana, 361, *Śp.*
Vāmana Svāmin, 250, *Sbhr.*
Bhaṭṭa Vāsudeva, 282, *Sbhr.*; see JHALAJJALA.
Bhaṭṭa Vṛddhi, 520, *Sbhr.*
Vyāsa, 40, **Skm.*
Śakradeva, 248, *Sbhr.*
Śacoka } 442, **Skm.*
Śadhoka }
Śarayaika, 30, **Sml. P.*
Śaśivardhana, 311, *Sbhr.*
Śāraṅga, 31, **Padyāv.*
Śīlā Bhaṭṭārikā, 508, *Śp.*, **Sml. P.*, **S.-Hārāv.*
Śrīharṣa, 206, *Sbhr.*
Saṃkula, 350, *Śp.*
Sarvānanda, 35, **Padyāv.*
Hanumān, 25, **Sml. B.*; 36, **S.-Hārāv.*; 43, *Śp.*
Harihara, 20, **Padyāv.*
Halāyudha, 48, **Skm.*

# ॥ कवीन्द्रवचनसमुच्चयः ॥

॥ नमो बुद्धाय ॥

१

नानाकवीन्द्रवचनानि मनोहराणि
संख्यावतां परमकण्ठविभूषणानि ।
आकम्पकानि शिरसश्च महाकवीनां
तेषां समुच्चयमनर्घमहं विधास्ये ॥

॥ सुगतव्रज्या ॥

२

आबाहून्नत[1]मण्डलाग्ररुचयः संनद्धवक्षःस्थलाः Vāmana IV. 7 (anon.).
सोष्माणो व्रणिनो विपक्षहृदयप्रोन्माथिनः कर्कशाः । *Sbhv.* 74 (कस्यापि).
उत्सृ[2]ष्टाम्बरदृष्टविग्रहभरा यस्य स्मराग्रेसरा **Subhāṣ.* I. (9*a*) (anon.)
मारा वा[3]रवधूस्तनाश्च न दधुः क्षोभं स वोऽव्याज्जिनः ॥ Jayaratha *ad As.* p. 95 (anon.).

अश्वघोषस्य ॥

३

नम्राः पादनखेषु यस्य दशसु ब्रह्मेशकृष्णास्त्वय
स्ते[1] देवाः प्रतिबिम्बनात्त्रिदशतां प्रव्यक्तमापेदिरे ।

---

२ [1] Vāmana has आकृष्टामल. [2] MS. त्सु: Vāmana has उद्वृत्ता गुरवश्च यस्य शमिनः श्यामायमानानना. [3] *Sbhv.*, *Subhāṣ*, Jayaratha, and Vāmana have योधा वार, and the last ends स एवाजितः. The MS. has मरा मार.

३ [1] MS. ते.

स त्रैलोक्यगुरुः सुदुस्तरभवाकूपारपारंगतो
मारव्यूहजयप्रगल्भसुभटः शास्ता तव स्तान्मुदे ॥

वसुक[ल्प]स्य ॥

४

Skm. I. 241. कामक्रोधौ द्वयमपि यदि प्रत्यनीकं वशित्वे[1]
हत्वानङ्गं किमिव हि रुषासाधितं[2] त्र्यम्बकेन ।
यस्तु क्षान्त्या शमयति शतं मन्मथाद्यानरातीन्[3]
कल्याणं वो दिशतु स मुनिग्रामणीरर्कबन्धुः[4] ॥

संघश्रियः ॥

५

श्रेयांसि वः स सुगतः कुरुतादपार
संसारसागरसमुत्तरणैकसेतुः ।
दुर्वारमारपरिवारबलावलेप
कल्पान्तसंततपयःप्रसरैरहार्यः ॥

अपराजितरचितस्य ॥

६

शास्ता समस्तभुवनं भगवानपाया
त्पायादपास्त[1]तिमिरो मिहिरोपमेयः ।
संसारभित्तिभिदुरो भवकन्दकन्द
कन्दर्पदर्पदलनव्यसनी मुनीन्द्रः ॥

वसुकल्पस्य ॥

---

३ [1] MS. छ. [2] MS. व्रू. [3] A space is perhaps left in the MS. for ल्प: but *Sml. P.* has Vasuka as author of our No. 59.

४ [1] *Skm.* प्रसिद्धं. [2] MS. °विन्नं? [3] *Skm.* द्री. [4] MS. च.

६ [1] MS. °धास्तु.

७

कारुण्यामृतकन्दलीसुमनसः प्रज्ञावधूमौक्तिक *Skm. I. 243

ग्रीवालंकरणश्रियः[1] शमसरित्[2]पूरोत्सलच्छीकराः[3]।

ते मौलौ भवतां मिलन्तु[4] जगतीराज्याभिषेकोचित

स्रग्भेदा अभयप्रदा[5]नचरणप्रेङ्खन्नखाग्रांशवः ॥

८

शीला(fol. 2a)म्भःपरिषेकशीतलदृढध्यानालवालस्फुर *Skm. I. 244

द्दानस्कन्धमहोन्नतिः पृथुतरप्रज्ञोल्लसत्पल्लवः[1]।

देयात्तुभ्यमवार्यवीर्यविटपः क्षान्तिप्रसूनोदयः[2]

सुच्छायः षडभिज्ञकल्पविटपी संबोधि[3]बीजं फलम् ॥

एतौ श्री[4]धरनन्दिनः ॥

९

एकस्यापि मनोभुवस्तदबलापाङ्गैर्जगन्निर्जये

†कार्य†[1] निहुतसर्वविस्मयरसव्यक्तिप्रकारा वयम्।

यस्त्वेनं सबलं च जेतुमभितस्तत्कम्पमात्रं भुवो

नारेभे सुगतस्तु तद्गुणकथा स्तम्भाय नः केवलम् ॥

कुमुदाकरमतेः ॥

१०

प्रत्येकानेक[1]जातिप्रतिवपुरमितावृत्तिजन्मार्जितैनो

भोक्तृव्रातोज्जिहीर्षाफलनिलयमहापौ[2]रुषस्यापि शा[3]स्तुः।

---

७ [1] Akṣara ill-formed, more resembling ग्र. [2] MS. सु. [3] MS. स. [4] Written °तास्मि (for °तास्मि). [5] MS. द्दा.

८ [1] MS. र्स्ल. [2] MS. प्रसन्नो°; *Skm.* प्रसूनोद्गमः. [3] *Skm* ध. [4] MS. व.

९ [1] *Sic* MS., contrary to sense and metre. Read कामं?

१० [1] MS. °त्येकान. [2] MS. त्पौ. [3] MS. °थि श्वा.

केऽप्युत्कर्षं स्तुवन्ति स्मरमपि जयतस्तद्वदामः किमस्मि
न्यो भस्मासीत्कटाक्षज्वलनकणिकया द्रागुमाकामुकस्य ॥

वल्लणस्य ॥

११

पायाद्वः समयः स मारजयिनो वन्द्यो ऽपि †तास्त्रोत्करः†
क्रोधाद्यत्र तदुत्तमाङ्गकवलोन्मीलन्मनो[2]विक्रमः ।
आसीदद्भुतमौलिरत्नमिलितव्यात्तान[न]च्छायिका
मालोक्यात्मन एव मारसुभटः पर्यस्तधैर्योदयः ॥

श्रीपाश्ववर्मणः ॥

१२

खेलाचञ्चलसंचरन्निजपदप्रेङ्खोललीलामिल
त्सद्यःसान्द्रपरागरागरचितापूर्वप्रसूनश्रियः ।
आश्लिष्यन्मधुलम्पटालिनिवहस्योच्चैर्मिथश्चुम्बनै
र्व्याकोषः कुसुमाञ्जलिर्दिशतु वः श्रेयो जिनायार्पितः ॥

जितारिनन्दिनः ॥

१३

दरोन्मुक्तारक्तस्फुरदधर[1]वीथीक्रमवम
न्मयूखान्तर्मूर्छद्द्युति दशनमुद्देशवशिनः ।
मुखं तद्वः शास्तुर्दिशतु शिवमज्ञानरजनी
व्यवच्छेदोऽन्मिच्छन्महिमघनसंध्यातप[2] इवः ॥

त्रिलोचनस्य ॥

१० [1] MS र्स.

११ [1] *Sic* MS. for त्रासोत्करः, with short syllable before त्र, as commonly in Buddhist Sanskrit? [2] MS. मा.

१३ [1] MS. वे. [2] MS. भ.

१४

कन्दर्पादपि सुन्दराकृति (fol. 2b) रिति प्रौढोत्सलद्रागया
वृद्धत्वं वरयोषितो ऽनयदिति त्रासाकुलस्वान्तया ।
मारस्यापि शरैरभेद्यहृदिति श्रद्धाभरप्रह्वया
पायाद्वः स्फुटबाष्पकम्पपुलकं रत्या जिनो वन्दितः ॥

तथैवेति श्रुतिः ॥

१५

पादाम्भोजसमीपसंनिपतितस्वर्णाथदेहस्फुर *Skm. I. 242
न्नेत्रस्तोमतया परिस्फुटमिलन्नीलाब्जपूजाविधिः ।
वन्दारुत्रिदशौघरत्नमुकुटोद्भूतप्रभापल्लव
प्रत्युन्मीलदपूर्वचीवरपटः शाक्यो मुनिः पातु वः ॥

वसुकल्पस्य ॥

१६

क एकस्त्वं पुष्पायुध मम समाधिव्ययविधौ
सुपर्वाणः सर्वे यदि कुसुमशस्त्रास्तदपि किम् ।
इतीवैनान्नूनं य इह सुमनोऽस्त्रांत्वमनय
त्स वः शास्ता शस्त्रं दिशतु दशदिङ्मारविजयी ॥

१५ [1] *Skm.* °स्तर्पत्र. [2] MS. र्ण.
१६ [1] MS. न. [2] MS. नू. [3] MS. स्त.

॥ लोकेश्वरव्रज्या ॥

१७

द्युतिस्वच्छज्योत्स्नापटपटलवृष्ट्या न कमलं
न चन्द्रः सान्द्रश्रीपरिमलगरिम्णास्यममलम् ।
मधूद्राणां निद्राभिदुरमपमुद्राद्भुतमुद
श्चकोरान् बिभ्राणं सरसिरुहपाणेरवतु वः ॥

पण्डितबुद्धाकरगुप्तानां ॥

१८

वरदकरसरोजस्यन्दमानामृतौघ
व्युपशमितसमस्तप्रेतसंघाततर्षः ।
जयति सितगभस्तिस्तोमशुभ्राननश्रीः
सहजगुरुदयार्द्रालोकनो लोकनाथः ॥

रत्नकीर्त्तेः ॥

१९

प्रत्युन्नाढरयस्थिराकृतिघनध्वानभ्रमन्मन्दर
क्षुब्धक्षीरधिवीचिसंचयगतप्रालेयपादोपमः ।

. . . . . . .

. . . . . . .

[॥ हरिव्रज्या ॥]

२०

[देवि त्वं कुपिता त्वमेव कुपिता को ऽन्यः पृथिव्या गुरु *Skm. I. 27
र्माता त्वं जगतां त्वमवे जगतां माता न विज्ञो ऽपरः । (वाक्पतेः)
देवि][1] (fol. 12a) त्वं परिहासकेलिकलहे ऽनन्तात्वमेवेत्यर्थं[2] *Padyāv. 28
ज्ञातानन्तपदो नमञ्जलधिजां शौरिश्चिरं पातु वः ॥ (हरिहरस्य
वाकपतिराजस्य ॥

२१

को ऽयं द्वारि हरिः प्रयाह्युपवनं[1] शाखामृगेणात्र[2] किं For reff. see below.
कृष्णो ऽहं दयिते बिभेमि सुतरां कृष्णः कथं वानरः[3] ।
मुग्धे[4] ऽहं मधुसूदनो[5] व्रज लतां तामेव पुष्पासवा[6]
मित्थं निर्वचनीकृतो[7] दयितया ह्रीणो[8] हरिः पातु [व]ः ॥

२२

मन्दक्काणितवेणुरह्नि शिथिले [सं]वर्तयन् गोकुलं
बर्हापीडकमुत्तमाङ्गरचितं गोधूलिधूम्रं दधत् ।

२० [1] Fols. 3–11 lost. *Padyāv.* begins राधे त्वं and otherwise diverges considerably. [2] MS. र्थ.

२१ **Skm.* I. 277 (शुभंकरस्य). *Sbhv.* 104 (कस्यचित्). *Śp.* 122 (कस्यचित्). *Aś. ad.* x. 1 (anon). *At.* p. 49 (anon). **Subhāṣ.* II (13*a*) (anon). Hemac. p. 234 (anon). [1] MS. प्रा. [2] MS. °ना; *Sbhv.*, *Śp.*, *Aś.*, *At.*, *Subhāṣ.*, Hemac. °गस्या. [3] MS. कुष्टः; *Sbhv.*, *Śp.*, *At.*, Hemac. क्रष्णादहं वानरात्. [4] *At.*, Hemac. कान्ते. [5] MS. द. [6] *Skm.*, *Śp.*, *Aś.* पुष्पान्विता; *Sbhv.*, *Subhāṣ.* तन्वीमले; *At.*, Hemac. मध्वन्विता; *Śp.*, *Subhāṣ.* पिब for व्रज. [7] *At.* °र्विषयी. [8] *Sbhv.*, *Subhāṣ.*, Hemac. तो.

२२ [1] MS. क्क.

म्लायन्त्या वनमालया परिगतः श्रान्तो ऽपि रम्याकृति
र्गोपस्त्रीनयनोत्सवो वितरतु श्रेयांसि वः केशवः ॥

२३

विष्णोर्दानवव[1]वाहिं[2]नीप्रमथनेच्छापूरणायादरा
द्दान्तः[3] पाणियुगे हरेण करजश्रेण्या श्रियालम्भितः[4] ।
निर्यातो वदनेन कुक्षिवसतेः पत्युस्तलादर्णसां
शङ्खे ऽपत्यपरंपरावृत इव श्रेयांसि पुष्णातु वः ॥

२४

स जयत्यादिवराहो दंष्ट्रानिष्पिष्टकुलगिरिकशेरुः ।
यस्य पुरः सुरकरिणः साङ्कुरमाषोपमा जाताः ॥

२५

31 जीयासुः शकुला[1]कृतेर्भगवतः पुच्छच्छटाछोटना
स्यापि). द्दुह्यन्तः शतचन्द्रिताम्बरतलं ते बिन्दवः सैन्धवाः ।
nda- śasti 3 (5) on.). यैर्व्यावृत्य पतद्भिरौर्वशिखिनस्तेजोजटालं वपुः
. B. 8a पानाध्मानवशादरोचकरुजश्च[2]क्रे चिरस्या[3]स्पदम् ॥

राजशेखरस्य ॥

२६

. I. 213 कुतस्त्व (fol. 12b) म[मु]कः[1] स्वतः स्वमिति किं न यत्कस्यचि
कपतेः). त्किमिच्छसि पदत्रयं[2] ननु भुवा किमत्यल्पया ।

---

२३ [1] MS. च. [2] MS. हे (hi). [3] MS. तुः. [4] MS. तिः.

२४ [1] MS. र.

२५ [1] *Khaṇḍap.* शफरा. [2] *Khaṇḍap.*, *Sp.* °जां च. [3] *Khaṇḍap.*, *Śp.* °राया.

२६ [1] *Skm.* °मनु (मु, णु) कः. [2] MS. here inserts ಐ many times.

द्विजस्य शमिनो मम त्रिभुवनं तदित्याशयो
हरेर्जयति निहुतः प्रकटितश्च वक्रोक्तिभिः ॥

२७

श्रेयोऽस्याश्चिरमस्तु मन्दरगिरेर्मा घानि पार्श्वैरियं[1][2][3] *Skm. I. 3
मावष्टम्भि महोर्मिभिः फणिपतेर्मा लेपि लालाविषैः।[4]
इत्याकूतजषः श्रियं जलनिधेरर्धोत्थितां पश्यतो
वाचोऽन्तःस्फुरिता बहिर्विकृतिभिर्व्यक्ता हरेः पान्तु वः॥[5]

२८

चटच्चटिति चर्मणि च्छमिति चोच्छलच्छोणिते[1][2] *Skm. I. 1
धगिद्धगिति मेदसि स्फुटरवोऽस्थिषु ष्ठादिति।[3][4] Sp. 126.
पुनातु भवतो हरेरमरवैरिनाथोरसि[5] Khaṇḍap.
क्कणत्करजपञ्जरक्रकचकाषजन्मानलः॥[6][7] (41) (anon

वाक्पतिराजस्योभौ ॥

२९

वन्दे भुजभ्रमितमन्दरमथ्यमान[1]
दुग्धाब्धिदुग्धकणविच्छुरितच्छवीकम्।[2]

---

२६ [1] MS. स. [2] MS. हृ.

२७ [1] MS. न्दि. [2] MS. र्घा. [3] MS. °श्वैरिय. [4] MS. मा. [5] MS. तु.

२८ [1] *Skm.* छ. [2] *Skm.* च्छ. [3] *Skm.*, *Śp.*, *Khaṇḍap.* °गद्ध. [4] *Skm.* स्फुटतरो; *Śp.* स्फुटरवास्थिनि; *Khaṇḍap.* स्फुटरवोऽस्थिनि. [5] *Śp.* °वक्षःस्थल; *Khaṇḍap.* °वीरोरसि. [6] MS. here inserts ङ three times. [7] *Skm.* °कोष (काष, काय) जन्मा रवः; *Khaṇḍap.* °घर्षजन्मानिलः.

२९ [1] MS. र्थ्य? [2] MS. र्धि.

नक्षत्रकवैरवियत्प्रतिरोधिनिन्द
दुन्निद्रकैरवतडागमुरो मुरारेः ॥

मुरारेः ॥

३०

n. IV. 2 रत्नशर- य). भ्रमति गिरिराट् पृष्ठे गर्जत्युपश्रुति सागरो[2]
दहति विततज्वाला[जा]लो[3] जगन्ति विषानलः ।
l. P. 152a यैकस्य). स तु विनिहितग्रीवाकाराडः कटाहपुटान्तरे[5]
ndap. 19 m.). स्वपिति भगवान् कूर्मो निद्राभरालसलोचनः ॥

३१

eff. see w. भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्धिनी
ध्यानालम्बनतां समाधिनिरतैर्नीतेर्हितप्राप्तये ।
लावण्यस्य[1] म(fol. 13a)हानिधी रसिकतां लक्ष्मीदृशो[2]-
स्तन्वती
युष्माकं कुरुतां भवार्त्तिशमनं[3] नेत्रे तनुर्वा हरेः ॥

२९ [1] MS. वै

३० [1] MS. हृ (?). [2] *Skm.* also सागरे; *Khaṇḍap.* °पर्यति सा°. [3] *Skm.* also तो. [4] MS. का. [5] *Khaṇḍap.* °तटोदरे.

३१ *Sbhv.* 43 (अमृतदत्तस्य). **Sml. P.* 6*b* (anon.). **Sml. B.* 16*b.* (अमृतदत्तस्य). **Padyāv.* 2 (सारङ्गस्य). *Kāvyapr. ad.* IX. 7 (anon.). *At.* p. 50 (anon.). *As.* p. 159 (anon.). *Kāvyaprad. ad.* IX. 7 (anon.). *Sāhityak. ad.* XI. 8 (anon.). **Subhāṣ.* I (5*a*) (अमृतदत्तस्य). *Rasagaṅg.* p. 774 (anon.). **Sūktiratn.* 41 (anon.). Hemac. p. 228 (anon.). [1] *Padyāv.* °ण्यैकसुधा; *Sāhityak.* °ण्यैकमहा. [2] *Padyāv., Sāhityak.* राधा. [3] *Subhāṣ.* °हरणं; Hemac. °शमिनी.

३२

[1]यस्मिन्नुद्धरति श्रुतीः पृथुतरो[2] हूंकारसारध्वनि[3]
र्मध्येसिन्धु वियन्मयो जलमयः स्तम्भस्त्वभूदम्बरे ।
पुच्छोदस्तविसारिणो जलनिधेः स्वर्गङ्गया संगम
श्रद्धाहूतखल[4]त्पुरातनमुनिर्मीनो हरिः पातु वः ॥

३३

जृम्भाविजिह्मितदृशः प्रथमप्रबुद्ध
लक्ष्मीकराम्बुरुहलालनलालसस्य ।
गाचा[1]पवृत्तिभरखर्वितशेषमव्या
दव्याहतं [2]मुरजितः कृतकप्रसुप्तं ॥

३४

मयान्विष्टो धूर्तः स सखि निखिलामेव रजनी
मिह स्यादत्र स्यादिति निपुणमन्यामभिसृतः ।
न दृष्टो भाण्डीरे तटभुवि न गोवर्धनगिरे
र्न कालिन्द्याः [कूले] न च निचुलकुञ्जे पुररिपुः ॥

३५

श्यामोच्चन्द्रा स्वपिषि[1] न शिशो नैति मामम्ब निद्रा
निद्राहेतोः शृणु सुत कथां कामपूर्वां कुरुष्व ।
रामो[2] नाम क्षि[तिपतिर]भून्माननीयो रघू[3]णा
मित्युक्तस्य स्मितमवतु वो देवकीनन्दनस्य[4] ॥

*Skm. I. …
(शतानन्द…
*Padyāv.
(सर्वानन्द…

---

३२ [1] In the MS. pādas 3-4 precede 1-2. [2] MS. रा. [3] MS. ने.
[4] MS. लु.

३३ [1] MS. य. [2] MS. ०तम्मु.

३५ [1] MS. हि. [2] MS. त्मो. [3] MS. पू. [4] *Padyāv.*
व्यक्तस्तम्भान्नरहरिरभूद्दानवं दारयिष्यन्नित्युक्तस्य स्मितमुदयते०.

३६

. I. 220 खर्वग्रन्थिविमुक्तसंधिविक[1]सद्व[2]क्षःस्फुरत्कौ[3]स्तुभं
क्ष्यतिरा- निर्यन्नाभिसरोजकुड्म[4]लकु (f. 13b) [टीगम्भीर] सामध्वनि ।
I). dap. 49 पात्रावाप्तिसमुत्सुकेन बलिना सानन्दमालोकितं
n.). r. ad. IV. mon.). पायाद्वः क्रमवर्धमानमहिमाश्चर्यं मुरारेर्[5]वपुः ॥

३७

ff. see उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा
धृत्वा चान्येन वासो विगलि[1]तकवरीभारमंशं[2] वहन्त्याः ।
भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वः
शय्यामालम्ब्य[3] नीतं वपुरलसलसद्बाहु लक्ष्म्याः[4] पुनातु ॥

३८

I. 326 संपूर्णः पुनरभ्युदेति किरणैरिन्दुस्ततो दन्तिनः
षित). कुम्भद्वन्द्वमिदं पुनः सुरतरोरग्रोल्ल[1]सन्मञ्जरी ।
इत्थं यद्वदनस्तनद्वयवलद्रोमावलीषु भ्रमः
क्षीराब्धेर्म[2]थने ऽभवद्विविषदां[3] लक्ष्मीरसावस्तु वः ॥

---

३६ [1] *Khaṇḍap.* ल. [2] MS. त्व. [3] MS. त्को. [4] *Skm.* ट्म. [5] MS. व.

३७ *Veṇīs.* prol. 6 (some MSS.). **Skm.* I. 339 (वररुचेः). *Sbhv.* 79 (भट्टनारायणस्य). *Śp.* 135 (निशानारायणस्य). *Sarasvatīk. ad.* II. 38, v. 167 (anon.). *Vetālap.* (Uhle) p. 161 (anon.). **S.-Ratnak.* I. 125 (anon.). Hemac. pp. 176 and 314 (anon.). [1] *Veṇīs.* (some MSS.) प्रशिथिल; *Vetālap.* (one MS.) विलुलित. [2] *Veṇīs., Śp., Vetālap., S.-Ratnak., Sarasvatīk.* शे. Hemac. (p. 314) °केशमंसं. [3] *Veṇīs., Sbhv., Śp., Vetālap., Sarasvatīk.,* Hemac. °लिङ्ग्य; *S.-Ratnak.* °रोप्य. [4] MS. क्ष्मा.

३८ [1] MS. र्स. [2] MS. °र्थेम (cf. ver. 29b). [3] MS. टां (?).

## ३९

भभभ्रमंति[1] किं मही[2] लललम्बते चन्द्रमाः
कृकृष्ण ववद द्रुत[3] हहहं[4]सन्ति किं वृष्णयः[5]।
शिशीधु मुमुमुञ्च मे ववववक्रमित्यादिकं[6]
मदस्खलितमालपन्[7] हलधरः श्रियं वः क्रियात् ॥

पुरुषोत्तमदेवस्य ॥

*Skm. I. 2[…] *S.-Ratna[…] I. 106 (ano[n.])

## ४०

किं किं सिंहस्ततः किं नरसदृशवपुर्देव चित्रं गृहीतो[1]
नैवं तत्को ऽत्र जीव द्रुतमुपनय तं नन्वयं प्राप्त एव[2]।
चापं चापं न खड्गं त्वरि[3]ततरमहो[3] कर्कशत्वं नखाना
मित्थं दैत्या[धिनाथं खरनखकुलिशैर्जघ्निवान्यः स वो
ऽव्यात्[4] ॥

*Skm. I. 2[…] (श्रीव्यास[…]दानौ). Khandap. […] (28) (anon.) At. p. 6, ll[…] sqq. (anon.) Hemac. p. […] (anon.).

## ४१

. . . . .] (fol. 14a) धेनुदुग्धकलशानादाय गोप्यो गृहं
दुग्धे वष्कयिणीकुले पुनरियं राधा शनैर्यास्यति ।
इत्य[1]न्यव्यपदेशगुप्तहृदयः कुर्वन्विविक्तं[2] व्रजं
देवः कारणनन्दसूनुरशिवं कृष्णः स मुष्णातु वः ॥

३९ [1] MS. भमि. [2] *Skm.*, *S.-Ratnak.* मेदिनी. [3] MS. द्रू. [4] MS. ह four times. [5] *Skm.* ष्ट. [6] *Skm.*, *S.-Ratnak.* पपपपानपात्रस्थितं. [7] MS. य.

४० [1] MS. गृहीत्वतो; *At.* धृतः किं. [2] *Skm.* नैवं धिक्को ऽत्र जीव . . . सो ऽपि संप्राप्त एव; *At.* नैवं कस्को ऽत्र जीवो . . . रे देव सं . . .; *Khandap.* नैतादृक्को ऽपि . . . मे देव . . . एष. Hemac. नैवेदृ°. [3] MS. चि; *Skm.* खड्गं झटिति हहहहा; *At.* खड्गः किमिति हहहहा; *Khandap.* न चापीत्यहहमहा. [4] Text given from *At.*; *Khandap.* has °दैत्येन्द्रवक्षः खरनखरमुखैर्ज°; *Skm.* मित्येवं दैत्यराजं निजनखकुलिशैर्जघ्निवान्सो ऽवताद्वः ॥ Hemac. diverges widely in *b-d*.

४१ [1] MS. त्या. [2] MS. °वक्त.

## ४२

ı. ɪ. 296 सच्चासार्त्ति यशोदया प्रियगुणप्रीतेक्षणं राधया
ह्नकोस्य). लग्नै[1]र्बल्ल[2]वसूनुभिः सरभसं संभावितात्मो[3]र्जितैः ।
yāv. 262 भीतानन्दितविस्मितेन विषमं[4] नन्देन चालोकितः
ह्लोकस्य). पायाद्वः करमूर्ध[5]सुस्थितमहाशैलः सलीलो हरिः ॥

सोन्नोकस्यैतौ ॥

## ४३

ı. ɪ. 201 दंष्ट्रासंकटवक्त्रकन्दरतरज्जिह्वाभृतो हव्यभु[1]
ास्य). ज्ज्वालाभासुरभूरिकेश[2]रसटाभारस्य दैत्यद्रुहः ।
1066 व्यावल्गद्बलवद्धिरण्यकशिपु[3]क्रोडस्थलीपाटन[4]
ुमतः). ṇḍap. 37 स्पष्ट[5]प्रस्फुटदस्थिपञ्जररवक्रूरा नखाः पान्तु वः ॥
on.).

वाकपतेः ॥

## ४४

n. ɪ. 292. लक्ष्म्या[1]ः केशप्रसव[2]रजसां बि[3]न्दुभिः सान्द्रपातै[4]
रुन्मूर्णश्रीर्घ[5]नविधुवनक्लान्तिनिद्रान्तरेषु ।
दोर्दण्डोऽसौ जयति[जयि]नः शार्ङ्गिणो मन्दराद्रि
ग्रावश्रेणीनिकषम[6]सृणक्षुण्णकेयूरपत्त्रः ॥

श्रीभगीरथस्य ॥

---

४२ [1] *Skm.*, *Padyāv.* न. [2] MS. र्स. [3] MS. त्मौ. [4] MS. म. [5] *Skm.*, *Padyāv.* पद्म.

४३ [1] *Skm.* °घर्घरलसज्जि° ; *Khaṇḍap.* °जिह्वस्य हव्याशन ; *Śp.* °न्द्ललसज्जिह्वस्य हव्याशन. [2] MS. रि. [3] MS. षु. [4] *Khaṇḍap.*, *Śp.* °स्थलास्फालन ; *Skm.* °पाटल. [5] *Khaṇḍap.* स्फार.

४४ [1] MS. क्ष्मा. [2] *Skm.* र. [3] MS. द्दे (*di*). [4] MS. ते. [5] MS. °रभ्यर्सशीर्घ. [6] MS. मं.

४५

नखक्रकचदारणस्फुटितदैत्यवक्षःस्थल
क्षरत्क्षतजनिर्झरप्रतिविभावितस्वाकृतेः । Cf. *Pracaṇḍapāṇḍava* v. 141 (=II. 52).
हरेरपरकेशरिक्षुभितचेतसः पातु वः
सरोष . . [2]ताधरभ्रुकुटिभङ्गभीमं मुखम् ॥

वाक्पतिराजस्य ॥

४६

वत्स क्ष्माधरगह्वरेषु विचरञ्चारप्रचारे गवां
हिंस्रान्वीक्ष्य पुरः पुराणपुरुषं नारायणं ध्यास्यसि ।
इत्युक्तस्य यशो(f. 14b)[दया मु]ररिपो[र]व्याज्जगन्ति स्फुर
द्बिम्बोष्ठद्वयगाढपीडनवशादव्यक्तभावं स्मितम् ॥

४७

देवो हरिर्जयति यज्ञवराहरूपः
सृष्टिस्थितिप्रलयकारणमेकमेव ।
यस्योदरस्थितजगत्त्रयबीजकोश
निर्गच्छदङ्कुरशिखेव विभाति दंष्ट्रा ॥

सोन्नोकस्य ॥

४८

बीजं ब्रह्मैव देवो मधु जलनिधयः कर्णिका स्वर्णशैलः *Skm. I. 31
कन्दं[2] नागाधिराजो वियदति[वि]पुलः[3] पत्त्रकोषावकाशः । (हलायुधस्य

४५ [1] MS. स्नरच्च. [2] Two akṣaras lost (वलि ?).

४६ [1] Three akṣaras lost, the last partly. [2] ढ has here in the MS. the later form. [3] The conjunct has here in the MS. an unusual (later) form.

४७ [1] MS. भी.

४८ [1] MS. क्षि. [2] *Skm.* न्दो. [3] *Skm.* °दपि विपुलः.

द्वीपाः पत्त्राणि मेघा मधुपकुलममूस्ता[1]रका गर्भधूली
[2]यस्यैतन्नाभिपद्मं भुवनमिति स वः शर्म देवो ददा[3]तु ॥

मालायुधस्य ॥

४९

rasvatīk. ad.
r. 36 (anon.),
d v. 138
non.).
ml. P. 3a.
-Ratnak.
55 (anon.).

कनकनिकष[1]स्वच्छे रा[धा]प[2]योधरमण्डले
नवजलधरश्यामामात्मद्युतिं[3] प्रतिबिम्बिताम् ।
असितसिचयप्रान्तभ्रान्त्या[5] मुहुर्मुहुरुत्क्षिप
ञ्जयति जनितव्री[6]डानर्म[7]प्रियासहि[8]तो हरिः ॥

वैद्दोकस्य ॥

४८ [1] *Skm.* °भूत्ता and °मस्ता (B. *sic*). [2] *Skm.* यं. [3] *Skm.* धा.

४९ [1] *Sarasvatīk.*, *Sml. P.*, *S.-Ratnak.* °कलश. [2] MS. य. [3] MS. तें (*tim*). [4] MS. ब्व. [5] MS. न्त्या ? [6] *Sarasvatīk.*, *Sml. P.* °ह्रासः. [7] MS. °मुः प्रे (*pri*). [8] *Sarasvatīk.*, *Sml. P.*, *S.-Ratnak.* °हृसि.

## ॥ सूर्यव्रज्या ॥

५०

यस्याधोधस्तथोपर्युपरि निरवधि भ्राम्यतो विश्वमश्वै
रावृत्तालातलीलां रचयति रयतो मण्डलं तिग्म[1]धाम्नः ।
सोऽव्यादुत्तप्तकार्तस्वरसरलशरस्पर्धिभिर्धामदण्डै
रुद्दण्डैः[2] प्रापयन्वः प्रचुरतमतमःस्तोममस्तं समस्तम् ॥

राजशेखरस्य ॥

Hemac. p. 1 (anon.).

५१

शु[क]तु[1]ण्डच्छवि सवितुश्चण्डरुचः पुण्डरीकवनबन्धोः ।
मण्डलमुदितं वन्दे[2] कुण्डलमाखण्डलाशायाः ॥

*Skm. I. 8 (विद्यायाः) Śp. 86 (नागम्यायाः) *Sūktiratn. (anon.).

५२

तुङ्गोदयाद्रिभुजगेन्द्रफणोपलाय
व्योमेन्द्रनीलतरुकाञ्चनप(fol. 15a)ल्लवाय ।
संसारसागरसमुत्क्रमि[1]योगिसार्थे[2]
प्रस्थानपूर्ण[3]कलशाय नमः सवित्रे[4] ॥

वराहमिहिरस्य ॥

*Skm. I. 6.

५० [1] Hemac. चण्ड. [2] MS. ०रूद्र.
५१ [1] MS. ०तण्ड. [2] MS. here inserts a daṇḍa.
५२ [1] MS. म. [2] MS. र्वे. [3] MS. र्ण. [4] MS. ते.

५३

ryaśataka
1.

संसक्तं सिक्तमूलादभिनवभुवनोद्यानकौतूहलिन्या
[यामिन्या] कन्ययेवामृतकरकलशावर्जितेनामृतेन ।
श्चर्कालोकः क्रियाद्वो मुदमुदयशिरश्चक्रवालालवाला
दुद्यन् बालप्रवालप्रतिमरुचिरहःपादपप्राक्प्रवालैः[2] ॥

मयूरस्य ॥

५३ [1] MS. तु. [2] *Sūryaś.* °रोहः.

॥ वसन्तव्रज्या ॥

५४

आरक्ताङ्कुरदन्तुरा कमलिनी नायामिनी [यामिनी] *Skm. II. 76
स्तोकोन्मुक्ततुषारमम्बरमणेरीषत्प्रगल्भं महः ।
अप्येते[1] सहकारसौरभमुचो वाचालिताः कोकिलै
रायान्ति [प्रिय]विप्रयुक्तयुवतीमर्मच्छिदो वासराः ॥

संघश्रियः ॥

५५

नैवैके वयमेव[1] कोकिलवधूकण्ठोच्चरत्पञ्चम
स्थानोद्बोधितपञ्चमार्गणगुणास्फालेन रोमाञ्चिताः ।
पश्यैते तरवो [ऽपि] सुन्दरि जरत्पन्त्रव्ययानन्तरो
द्भिन्नापाटलकोटिसंपुट[2]दलप्रादुर्भवत्कुड्मलाः ॥

विनयदेवस्य ॥

५६

मलयमहीधरपवनः कलकण्ठकलध्वनिर्निकुञ्जलताः ।
उत्कलिका उत्कलिकाश्चेतसि जनयन्ति लोकस्य ॥

श्रीकण्ठस्य ॥

५७

. . [1] न प्रहितो नवः प्रियसखीवर्गेण बद्धस्पृह
श्चित्तेनोप[2]हृतः स्मराय न समुत्स्रष्टुं गतः पाणिना ।

---

५४ [1] MS. ०प्ये ऽते.
५५ [1] MS. नैवेके वयत्म. [2] MS. यु.
५७ [1] Two akṣaras lost; read कान्तेन? [2] MS. पं.

आमृष्टो मुहुरीक्षितो मुहुरभिघ्रातो मुहुर्लोठितः[1]
प्र.....[3] (fol. 15b):कृतो मृगदृशा किं किं न चूताङ्कुरः[4] ॥

वाङ्कूटस्य ॥

५८

द्विस्त्रिः कोकिलया रुतं चिचतुरैश्चूताङ्कुरैरुद्गतं
कोषान् बिभ्रति किंशुका मधुकरश्रेणीजुषः पञ्चषान्।
क्वापि [क्वा]पि महाकुलाकुलतया कान्तापराधग्रह
ग्रन्थिच्छेदसमुद्यतं च हृदयं दोलायते सुभ्रुवाम् ॥

नीलस्य ॥

५९

Skm. II. 756. Sarasvatik ad. .28 (anon.). Kavyakalpa-lā, p. 175 (anon.). Sml. P. 153a (...सुकस्य).

जम्बूनां कुसुमोदरेष्वतिरसादाबद्धपानोत्सवाः
कीराः पक्वफलाशया मधुकरीश्चुम्बन्ति मुञ्चन्ति च ।
एतेषामपि पश्य किंशुकतरोः पत्त्रैरभिन्नत्विषां
पुष्पभ्रान्तिभिरापतन्ति सहसा चञ्चूषु भृङ्गाङ्गनाः ॥

राजशेखरस्य ॥

६०

Anargharāghava v. 6. Sml. B. 190a.

दृश्यन्ते मधुमत्तकोकिलवधूनिर्धूतचूताङ्कुर
प्राग्भारप्रसरत्परागसिकतादुर्गास्तटीभूमयः ।

५७ [1] MS. घा. [2] MS. धि ? [3] Five akṣaras lost in MS. [4] MS. का.

५८ [1] MS. यु. [2] MS. स्रा. [3] MS. ते.

५९ [1] *Sarasvatīk.*, *Sml. P.* °मोत्करे नवमधून्या° ; *Kāvyakalp.* °मोद्गमे. [2] *Skm.*, *Sarasvatīk.* °रब्ध. [3] MS. म्व or स्व ; *Sml. P.* श्चिल्वन्ति (*sic*) ; *Kāvyakalp.* श्चिन्वन्ति. [4] MS. या. [5] *Sarasvatīk.* नीलकिंशुकदलैरेभिः समानत्विषां ; *Sml. P.* जातकिं° ; *Kāvyakalp.* जातकिंशुकदलश्रेणीसमानत्विषां. [6] *Kāvyakalp.* °भ्रान्तिभृतः; *Sml. P.* °भृतः पतन्ति मधुपाश्च°.

६० [1] MS. से (*si*).

याः कृच्छ्रादभिलङ्घ्य लुब्धकभयात्तैरेव रेणूत्करै
र्धारावाहिभिरस्ति लुप्तपदवीनिःशङ्कमेणीकुलम् ॥

मुरारेः ॥

६१

अशिथिलपरिष्पन्दः कुन्दे तथैव मधुव्रतो
नयनसुहृदो वृक्षाश्चैते न कुड्मलशालिनः ।
दलति कलिका चौंती नास्मिंस्तथा मृगचक्षुषा
मथ च हृदये मानग्रन्थिः स्वयं शिथिलायते ॥

६२

कान्तां हित्वा विरहविधुरारम्भखेदालसाङ्गी[1]
मामुल्लङ्घ्य व्रजतु पथिकः को ऽपि यद्यस्ति शक्तिः ।
इत्याशोकी जगति सकले वल्लरी चीरिकेव
प्राप्तारम्भे कुसुमसमये कामदेवेन दत्ता ॥

६३

मन्दं दक्षिणमाहृय(fol. 16a) न्ति पवनं पुंस्कोकिलव्याहृतैः *Skm. II. 762 (कस्यचित्)
संस्कुर्वन्ति वनस्थलीः किसलयोत्तंसैर्निषक्तालिभिः ।
चन्द्रं सुन्दरयन्ति मुक्ततुहिनप्रावारया ज्योत्स्नया
वर्धन्ते च विवर्धयन्ति च मुहुस्ते ऽमी स्मरं वासराः ॥

६० [1] *Anargh.* (ed. *Kāvyamālā*) ति.
६१ [1] MS. नृ. [2] MS. ञौ.
६२ [1] MS. खी.
६३ [1] MS. न्त. [2] MS. त्रि. [3] MS. त्स्न.

६४

हृद्यस्निग्धैः[1] परभृतरुतैर्मुक्तदीर्घप्रवासः
प्रत्यावृत्तो मधुरिति वदन्दक्षिणो गन्धवाहः ।
शिञ्जल्लोलभ्रमरवलयः[2] काननालीवधूनां
सद्यः कुन्दस्मितबृहतिकाः पूर्णपा[3]त्रीकरोति ॥

६५

लोलैः कोकिलमण्डलैर्मधुलिहां[1] चंचूर्यमाणैर्गणै
र्नीरन्ध्रैर्गृहवाटिकापरिसरेष्वङ्गारितैः किंशुकैः ।
प्रारब्धे तिमिरे वसन्तसमयक्षोणीपतेर्भ्राम्यतः
प्रस्निग्धा परितो धृतेव कलिकादीपावलिश्चम्पकैः ॥

मनोविद्यैतौ ॥

६६

...citysvicāra-
...rcā ad. v.
... (मालव-
...वलय स्य).
...mana. ad.
... I. 2. 5
...non.).
...mac. pp.
...4 and 197
...non.).

च्युतसुमनसः[1] कुन्दाः पुष्पोद्गमेष्वलसा[2] द्रुमा[3]
मनसि च गिरं ग्रथ्नन्तीमे[4] किरन्ति न कोकिलाः ।
अथ च सवितुः[5] शीतोल्लासं लुनन्ति मरीचयो
न च जठरतामालम्बन्ते[6] क्लमोदयदायिनीम् ॥

६७

...ddhaś. I. 25.
...m. II. 767.
...mac. p. 134
...non.).

साम्यं संप्रति सेवते विचकिलं[1] षाण्मासिकैर्मौक्तिकै
र्बाह्लीकीदशनव्रणारुणतलैः[2] पत्त्रैरशोको ऽर्चितः[3] ।

६४ [1] MS. ग्धे. [2] MS. च. [3] MS. °र्णप्रा.

६५ [1] MS. हा.

६६ [1] MS. से:. [2] *Auc.* °मैर. [3] MS. °लिना. [4] *Auc.*, Vām. गृह्ण; acc. to Vām. the original reading was मलयमरुतः सर्पन्तीमे विमुक्तधृतच्छदाः । [5] MS. °चित्तः. [6] MS. च.

६७ [1] MS. ल. [2] *Skm.* °चलैः, corrected to °तरैः; *Viddhaś.* °तरैः. [3] *Viddhaś.* °कास्ति.

[भृङ्गाल]ङ्घि[1]तकोटि किंशुकमिदं किंचिद्विवृन्तायते
माञ्जिष्ठैर्मुकुलै[2]श्च पा[3]टलितरोरन्यैव काचिल्लिपिः ॥

६८

गर्भग्रन्थिषु वीरुधां सुमनसो मध्येङ्कुरं पल्लवा *Viddhaś.* I.
वाञ्छा[1]मा(fol. 16b)[त्रपरि]ग्रहः पिकवधूकण्ठोदरे पञ्चमः। *Skm. II. 7 *Sml. B. 11 At. p. 67 (anon.).
किं च त्रीणि जगन्ति जिष्णु दिवसैर्द्वित्रैर्मनोजन्मनो Hemac. p. (anon.).
देवस्यापि चिरोज्झितं यदि भवेदभ्यास[2]वश्यं धनुः ॥

राजशेखरस्यैतौ ॥

६९

शीतार्तैरिव भग्नशैशिरनिशाभागैरहः स्फायते
गर्भे[1] बिभ्रति किंशुका इव दिशां तापाय वह्न्यङ्कुरम्।
किं च स्वाश्रयसंभृतप्रथिमसु च्छायातपाङ्गेष्वयं
लोकः स्तोकरसोऽद्य न क्वचिदपि स्वच्छन्दमानन्दति॥

त्रैलोचनस्य ॥

७०

उद्भिन्नस्तवकावतंससुभगाः प्रेङ्खन्मरुन्नर्तिताः
पुष्पोद्गीर्णपरागपांशुललसत्पत्त्रप्रकाण्डत्विषः।
गम्भीरक्रमपञ्चमोन्मदपिकस्था[2]नोच्छलद्गीतयः
प्रत्युज्जीवितमन्मथोत्सव इव क्रीडन्त्यमी भूरुहः ॥

६७ [1] *Viddhaś.* also ॰लम्बि; in the MSS. लंघि can be read. [2] *Viddhaś.* माञ्जिष्ठैः स्तवकैस्. [3] MS. या. [4] *Skm.* ॰वृन्तैव॰.

६८ [1] *At.* छाया. [2] MS. ॰स्या (?) म. Hemac. and *At.* have चिरेप्सितं.

६९ [1] MS. भं.

७० [1] MS. च. [2] MS. था.

७१

प्रागेव जैचमस्त्वं सहकारलता स्मरस्य चापभृतः ।
किं पुनरनल्पनिपतितमधुकरविषकल्कलेपेन ॥

शुभाङ्गस्य ॥

७२

स्वस्ति श्रीमलयाचलात्स्मरसखः श्रीमान्वसन्तानिलः
क्रीडावेश्मसु कामिनः कुशलयत्येतच्च[1] वक्तीतरत् ।
एषो ऽहं मुदितालिकोकिलकुलं कुर्वन्वनं प्राप्तवा
न्युष्माभिः प्रियकामिनीपरिगतैः स्थातव्यमस्मादिति॥

७३

II. 771 एते नूतन[1]चूतकोरकघनग्रासातिरेकीभव
यचित्). त्कराठ[2]ध्वानजुषो हरन्ति हृदयं मध्येवनं कोकिलाः ।
येषामक्षिनिभेन भान्ति भगव(fol. 17a)द्भूतेशनेत्रा[3]नल
ज्वालाजालकरालितासमशरा[4]ङ्गारस्फुलिङ्गा इमे[5] ॥

७४

94
काया:) किंशुककलिकान्तर्गतचन्द्र[1]कलास्पर्धि[2] केशरं भाति ।
P. 90b ) रक्तनिचोलकपिहितं धनुरिव जतुमुद्रितं वितनोः ॥
B. 111a )
tnak.
52
).

वर्धनस्य[3] ॥

७१ [1] MS. राय.
७२ [1] MS. र्च्च.
७३ [1] MS. नृ. [2] *Skm.* एढ and एठे. [3] MS. त्रो. [4] MS. स. [5] *Skm.* इव.
७४ [1] *Śp.*, *S.-Ratnak.*, *Sml.* (*P.* and *B.*) °र्गतमिन्दु. [2] MS. र्द्धे (*rddhi*). [3] MS. र्ध.

७५

वाप्यो दन्तुरितोदराः कमलिनीपत्त्राङ्कुरग्रन्थिभि
श्चूतानां कलिकामिलन्मधुलिहां कापि स्थितिर्वर्तते ।
दौर्भाग्योपनयाय सांप्रतमपामल्पो ऽपि मार्गश्रमः
शिक्षामुल्ललितुं ददाति रजसां गन्त्रीपथे मारुतः ॥

अभिनन्दस्य ॥

७६

आरक्तैर्नवपल्लवैर्विटपिनो नेत्रोत्सवं तन्वते
तान्धुन्वन्नयमभ्युपैति मधुरामोहो[2] मरुद्दक्षिणः ।
तेनालिङ्गितमात्र एव विधि[ना[3]] प्रादुर्भवन्निर्भर
क्रीडाकूतकषायितेन मनसा लोको ऽयमुन्माद्यति ॥

७७

काप्यन्या मुकुलाधिकारमिलिता लक्ष्मीरशोकद्रुमे
माकन्दः समयोचितेन विधिना धत्ते ऽभिजातं वपुः ।
किं च†पाट†[3]गिरेरनङ्गविजयप्रस्तावनापण्डितः
स्वैरं सर्पति बालचन्दनलतालीलासखो मारुतः ॥

७८

वह्निर्मन्ये हिमजलमिषात्संश्रितः किंशुकेषु
व्यामं धूमैः स खलु कुरुते काननं कोरकाख्यैः । *Skm. II. 768 (कस्यचित्)

७५ [1] MS. या ?
७६ [1] MS. वि. [2] MS. *sic* (for द्दो ?). [3] Akṣara omitted.
७७ [1] MS. मे (*mi*). [2] MS. सो. [3] The MS. has after
च a mark of correction. Concerning the reading of this
corrupt passage see the note *ad loc.* [4] MS. र्थं.
७८ [1] *Skm.* °भया.

संतापार्थं कथमितरथा पान्थसीमन्तिनीनां
पुष्पव्याजाद्विसृजति शिखाश्रेणिमुद्गाढशोणीम्[3] ॥
यौतायणेः ॥

७९

श्रोण्यां चित्रः कुरुवकगुणः कर्णयोर्मुग्धचूतं
रक्ताशोकं प्रणयि कुचयोर्माधवी मू[र्ध(fol. 17b)जे][1]षु ।
सर्वाङ्गीणो बकुलरजसा पिञ्जरेणोपरागः
स्त्रैणो[2] यूनां भवतु रतये वेशसर्वाभि[3]सारः ॥
सावर्णेः ॥

८०

मुग्धाताम्रैर्नवकिशलयैः संभृतोदारशोभं
प्रादुर्भूतभ्रमरसरणीयौवनोद्भेदचिह्नम् ।
सीमन्तिन्यः कुसुमधनुषा बद्धसख्यस्य मासः
स्निग्धस्मेरैर्मुखमधिगुणं दृष्टिपातैः पिबन्ति ॥
वागुरस्य ॥

८१

शिलीमुखैरद्य मनोज्ञपक्षै
र्विषोपलेपादिव कज्जलाभैः ।
नितान्तपूर्णा[1] मुचकुन्दकोषा
विभान्ति तूणा इव मन्मथस्य ॥

७८ [1] MS. कः for कथ. [2] These two akṣaras are mutilated. [3] *Skm.* णां and णी.

७९ [1] Two akṣaras partly lost. [2] MS. स्त्रै. [3] MS. ति (?).

८१ [1] MS. णो. [2] MS. र्स.

८२

स्नेहं स्रवन्ति तरवः पञ्चापि क्षिपति मार्गणान्मदनः ।
परिमुक्तकण्ठरोधः परपुष्टः क्षरति माधुर्यम् ॥

श्रीधर्मकरस्य ॥

८३

संकुचिता इव पूर्वं दुर्गा[1] इव तुषारजनितजंडिमानः ।
संप्रत्युपरमितहिमे क्रमशो दिवसाः प्रसारजुषः ॥

श्रीधरणीधरस्य ॥

८४

दुःश्लिष्टदुर्लक्ष्यपलाशसंधी
न्यापाटलाग्राणि हरिन्ति मूले[1] ।
कुशेशयानां शुकशावभांसि
प्रादुर्बभूवुर्नवकुलझानि ॥

८५

उपनयति कपोले लोलकर्णप्रवाल
क्षणमुकुलनिवेशान्दोलनव्यापृतानाम् ।
परिमलितहरिद्रान् संप्रति द्राविडीनां
नवनखपदतिक्तानातपः स्वेदबिन्दून् ॥

योगेश्वरस्य ॥

८३ [1] MS. र्गाः, followed by a र, which was intended for an otiose mark following the blank square round the hole in the leaf. [2] MS. ज्ज.

८४ [1] The MS. here inserts the sign ꣸ many times.

८५ [1] MS. भि.

८६

सद्यस्तप्तो भ्रमति रजनी वासवः खण्डयित्वा
क्षीणक्षीणा तदनु भजते सापि सम्यक्प्रसादम् ।
एको . . . . . . .
. . . . . . . .

[॥ ग्रीष्मव्रज्या ॥]

८७

. . . . . . . . . . . . . . .
. . (fol. 19*a*) वर्जितमुग्धवातहरिणश्रेणीपरीतान्तिकाः।
औत्सुक्यं जनयन्ति पान्थपरिषद्घर्माम्बुबिन्दूत्कर
व्याक्षेपक्षममन्दमन्दमरुतो मार्गस्थलीपादपाः ॥

८८

चञ्चच्चञ्चुगणोदरैः शिथिलितप्रायांसमुत्पक्ष्मल
न्यञ्चत्पक्षपुटावकाशम . . त्याश्वोष्मभिर्नीयते।
जङ्घाकुञ्चनलब्धनीडनिविडावष्टम्भकष्टोज्झित
क्षेपीयःपवनाभिघातरभसोत्क्षेपैरहः पक्षिभिः ॥

८९

धास्यत्यद्य सितातपत्त्रसुभगं सा राजहंसी शिशोः
स्मेराम्भोरुहवासिनो ऽपि शिरसि स्नेहेन पक्षद्वयम्।
तृष्णार्त्तः शुकशावको ऽपि सुतनोः पीनस्तनासंगिनीं
मुक्ताहारलतां तदङ्कवसतिस्तोयाशया पास्यति ॥

९०

भुवां घर्मारम्भे पवनचलितं तापहतये
पटच्छत्त्राकारं वहति गगनं धूलिपटलम्। *Skm. II. 781 (भवभूतेः).

८८ [1] Two akṣaras omitted; read ॰त्याश्वो?

९० [1] *Skm.* (A.) ॰च्छाया. [2] *Skm.* व (A.), र (B.).

अमी मन्दाराणां दवदहनसंदेहितधियो
न ढौकन्ते पातुं झटिति मकरन्दं मधुलिहः ॥

९१

*Skm. II. 792 (कस्यचित्).

अपां कूले लीनं क्षणपरिचितं चन्दनरसे
मृणालीहारादौ कृतलघुपदं चन्द्रमसि च ।
मुहूर्तं विश्रान्तं सरसकदलीकाननतले
प्रियाकण्ठाश्लेषे निवसति परं शैत्यमधुना ॥

९२

प्रान्तारक्तनिलोचनाञ्चलदरीव्यग्राल्पमक्षीभय
प्रोद्भूतोभयशृङ्गकोटिविग[लद्भू]वालवल्लीसखैः ।
पाथोबिन्दुभिरक्षिसंधिषु शनैः संसिच्यमानः सुखं
मग्नो वारिणि दूरनिःसहतया निद्रायते सैरिभः ॥

९३

तापं स्तम्बेरमस्य प्रकटयति करः शीकरैः ..(fol. 19b)मुष्णन्
पङ्काङ्कं पल्वलानां वहति तटवनं माहिषैः कायकाषैः ।
उत्ताम्यत्तालवश्च प्रतपति तरणावांशवी तापतन्द्री
मद्रिद्रोणीकुटीरे कुहरिणि हरिणा रात्रयो यापयन्ति ॥

---

९० [1] *Skm.* द्र (A.), द (B.). [2] *Skm.* ढो. [3] MS. का. [4] MS. टे (*ṭi*).

९१ [1] *Skm.* मू. [2] MS. मू. [3] *Skm.* ले (A.), टे ? (B.). [4] *Skm.* निविशति (B. निवसति) पदं.

९२ [1] MS. भं.

९३ [1] Three akṣaras almost entirely lost: ? read श्रोणिमु. [2] Corrected from ति. [3] MS. वा. [4] MS. द्रा. [5] MS. रे (*ri*).

९४

. डाः[1] पान्थनखंपचाः प्रचयिनो गन्त्रीपथे पांशवः
कासारोदरशेषमम्बु महिषो मथ्नाति[2] ताम्यन्निमि ।
†दृष्टिर्धावति धातकीवनमसूक्तर्षेण†[3] तारस्त्रवी
कण्ठान् बिभ्रति विष्कराः शरशमीनीडेषु नाडींधमान् ॥

बाणस्यैभी ॥

९५

सुभगसलिलावगाहाः पाटलिसंसर्गसुरभिवनवाताः । *Śakuntalā* 3.
प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः ॥

कालिदासस्य ॥

९६

अग्ने तप्तजला[1] नितान्तशिशिरा मूले मुहुर्बाहुभि
र्व्यामथ्योपरतप्रियेषु पथिकैर्मार्गेषु मध्यंदिने ।
आधाराः प्लुतबालशैवलदलच्छेदा[व]कीर्णोर्मयः
पीयन्ते हलमुक्तमग्नमहिषप्रक्षोभपर्याविलाः ॥

योगेश्वरस्य ॥

९७

मृद्भूयिष्ठतया गुरून् परिहरन्नारण्यकान् गोमयान्
वल्मीकानुपगूहति[1] प्रशिथिलं ज्वालाभिरुद्दल्बजान् ।
वह्नि†मीतं[2]†किलिञ्जसंचयसमुत्सिक्तश्चरन् कानने
प्रस्निग्धानिह विष्किराण्डकललानाज्याशया लुम्पति ॥

तस्यैव ॥

---

९४ [1] Read वाताः? [2] MS. थ्नो. [3] Read गृष्टि (or सृष्टि) . . . सूक्तर्षेण?

९६ [1] MS. ला. [2] MS. यदि.

९७ [1] MS. मु or सु? [2] MS. °र्मीड? For र्मीढ?

९८

दूरीभूतशरारि विक्लवबकं .[1] कान्तकारण्डवं
क्लाम्यत्कङ्कमचक्रवाकममिलन्मङ्गुप्रपातप्लवम्[2] ।
क्लिष्टक्रौञ्चमधार्तराष्ट्रमपतत्कोयष्टि निष्टीटिभं
सीदत्सारसमप्रसक्तकुररं कालेन जातं (fol. 20a)सरः ॥

तस्यैव ॥[5]

९९

*Skm. II. 787 (मधुरशीलस्य)

तोयोत्तीर्णाः श्रयति कवरीः शेखरः[1] सप्तलानां
शैत्यं सिञ्चत्युपरि कुचयोः पाटलाकण्ठदाम ।
कान्तं कर्णावभिनिविशते कोमलाग्रं शिरीषं
स्त्रीणामङ्के विभजति तपस्तच्च तत्रात्मचिह्नम् ॥

मधुशीलस्य ॥

१००

शुकपक्षहरितकोमलकुसुमसटानां शिरीषयष्टीनाम् ।
तलमाश्रयति दिनातपभयेन परिपिण्डितं शैत्यम् ॥

वागुरस्य ॥

१०१

Viddhaś. IV. 4. *Skm. II. 794.

हरन्ति हृदयानि यच्छ्रवणशीतला वेणवो
यदर्घति करम्बिता शिशिरवारिणा[3] वारुणी ।
भवन्ति च हिमोपमाः स्तनभुवो यदेणीदृशां[4]
शुचेरुपरि संस्थितो रतिपतेः प्रसादो गुरुः ॥

९८ [1] One akṣara lost; read प्रक्रान्त or निष्क्रान्त? [2] MS. व. [3] MS. ष्टे. [4] MS. को. [5] The words सरः . . . व are inserted above l. 1 of 20a.

९९ [1] *Skm.* °त्तीर्णा . . कवरी शेखरं. [2] MS. य.

१०१ [1] Corrected from ह्मार or हरि. [2] *Viddhaś.* दृ and र्घ. [3] *Viddhaś.* also °वायुना. [4] *Viddhaś.* also शो. [5] *Viddhaś.* श्च.

१०२

जलार्द्राः[1] संव्यानं[2] बिसकिसलयैः कैलिवलयाः *Viddhaś.* IV.3.
शिरीषैरुत्तंसो[4] विचकिलमयी हाररचना ।
शुचाविणाक्षीणां मलयजरसार्द्राश्च तनवो
विना तन्त्रं मन्त्रं रतिरमणमृत्युंजयविधिः ॥

१०३

रजनिविरमयामेष्वादिशन्ती रतेच्छां *Viddhaś.* IV.2.
किमपि कठिनयन्ती नारिकेलीफलाम्भः ।
अपि[4] परिणमयित्री राजरम्भाफलानां
दिनपरिणतिरम्यां वर्तते ग्रीष्मलक्ष्मीः ॥

एते राजशेखरस्य ॥

१०४

अम्भोधेर्जलयन्त्रमन्दिरपरिस्पन्दे ऽपि निद्राणयोः **Skm.* II. 784
श्रीनारायणयोर्घनं विघटयत्यूष्मा समालिङ्गनम् । (कस्यचित्).
किं चोत्तप्तविय (fol. 20*b*) त्कपालफलके कङ्कालशेषश्रियं
चन्द्रं मर्मरयन्ति पर्पटमिति क्रूरा रवेरंशवः ॥

नारायणलच्छेः ॥

---

१०२ [1] *Viddhaś.* also द्रं. [2] *Viddhaś.* also ग्रष्माणां. [3] MS. कै. [4] *Viddhaś.* सा. [5] MS. च. [6] MS. धा.

१०३ [1] *Viddhaś.* च. [2] MS. स. [3] *Viddhaś.* also नालिकेरी. [4] *Viddhaś.* also यि. [5] *Viddhaś.* °भोग्या and °योग्या. [6] ष्म ; the akṣara is partly lost.

१०४ [1] *Skm.* धि. [2] MS. न्दि. [3] MS. यं. [4] *Skm.* पर्पटवर or वक्र. [5] MS. °रङ्श.

## ॥ प्रावृड्व्रज्या ॥

१०५

*latīm.* IX. वानीरप्रसवैर्निकुञ्जसरितामासक्तवासं पयः
पर्यन्तेषु च यूथिकासुमनसामुज्जृम्भितं जा[1]लकैः ।
उन्मीलत्कुटजप्रहासिषु गिरेरालम्ब्य सानूनितः
प्राग्भारेषु शिखण्डिताण्डवविधौ मेघैर्वितानाय्यते ॥

१०६

*latīm.* IX. फलभरपरिणामश्यामजम्बूनिकुञ्ज
स्खलिततनुतरङ्गामुत्तरेण स्र[1]वन्तीम्[2] ।
उपरि विघटमान[3]प्रौ[4]ढतापिच्छनीलः
श्रयति शिखरमद्रेर्नू[5]तनस्तोयवाहः ॥

१०७

*latīm.* IX. जृम्भाजर्जरडिम्ब[डम्ब]रघनश्रीमत्कदम्बद्रुमाः
शैलाभोगभुवो भवन्ति ककुभः कादम्बिनीश्यामलाः ।
उद्यत्कुन्दलका[1]न्तकेतकभृतः कच्छाः सरिच्छ्रोतसा
माविर्[2]गन्धिशिलीन्ध्र[3]लोध्रकुसुमस्मेरा वनानां ततिः ॥

---

१०५ [1] MS. ज्वा.

१०६ [1] *Mālatīm.* स्न. [2] MS. न्तीः. [3] *Mālatīm.* °मानः and उपचितघनमान. [4] MS. प्रो. [5] MS. नू.

१०७ [1] MS. भा. [2] *Mālatīm.* माविर्भूत; MS. मानवि° with न deleted. [3] MS. न्ध्र.

१०८

उत्फुल्लार्जुन[1]सर्जवासितवहत्पौ[2]रस्त्यझंझामरु[3] *Mālatīm.* IX. 16.
त्प्रेङ्खोलस्खलितेन्द्रनीलशकल[4]स्निग्धाम्बुदश्रेणयः ।
धारासिक्तवसुंधरासुरभयः प्राप्तास्त एते ऽधुना[5]
घर्माम्भोविगमागमव्यतिकरश्रीवाहिनो वासराः ॥

भवभूतेरमी ॥

१०९

एणी याति विलोक्य बालशलभा[1]न् शष्पाङ्कुरादित्सया
च्छत्रीकुड्म[2]लकानि रक्षति चिराद्दण्डभ्रमात्कुक्कुटी ।
धूत्वा धावति कृष्ण[3]कीटप(fol. 21*a*)टलश्रेणीं शिखण्डी शिरो
दूरादेव व[4]नान्तरे विषधरग्रासाभिलाषातुरः ॥

११०

आसारान्तमृदुप्रवृत्तमरुतो मेघोपलिप्ताम्बरा[1] *Skm. II. 826 (कस्यचित्).
विद्युत्पातमु[2]हूर्तदृष्टककुभः सुप्तेन्दुताराग्रहाः ।
धाराक्लिन्नकदम्बसंभृतसु[3]रामोदोद्वहाः [4]प्रोषितै
र्निःसंपातविसारिदर्दुररवा नीताः कथं रात्रयः ॥

योगेश्वरस्य ॥

१११

दात्यूहध्वनिभाञ्जि वेत[1]सशिखासुप्तोरगाणि ध्वन *Skm. II. 816 (योगेश्वरस्य).
त्कादम्बानि कुरङ्ग[2]यूथकलितस्तूपान्युदम्भांसि[3] च ।

---

१०८ [1] MS. र्ज. [2] MS. यौ. [3] *Mālatīm.* also झञ्झानिल. [4] *Mālatīm.* also °वलय. [5] *Mālatīm.* also त एवाधुना.

१०९ [1] MS. ता. [2] MS. °त्रीकुड्म. [3] MS. ष. [4] MS. च.

११० [1] Corrected from म्वा. [2] MS. मू. [3] *Skm.* °संभृत-सुधा; MS. सम्बृ°. [4] *Skm.* also प्रो (A.).

१११ [1] MS. तु or त्त. [2] MS. ज्ञ. [3] MS. °म्भान्सि.

तीराण्यद्य पिपीलिकासमुदयावर्जेज्जटालोलप
व्याघ्रान्युन्मदकुक्कुभानि सरितां कुर्वन्ति लोलं मनः ॥

११२

कान्तां क्वापि विलम्बिनीं कलरुतैराहूय [चेत[1]]स्ततो
दिग्भागानवलोक्य रङ्गवसुधामुत्सृज्य पंक्त्यां ततः ।
एष स्फारमृदङ्गनादमधुरैरम्भोमुचामारवै
बर्हश्रेणिकृतातपत्त्ररचनो हृष्टः शिखी नृत्यति ॥

११३

पीताम्भःस्तिमिताः सृजन्ति सलिलान्याबद्धधारं घना
स्तद्धाराध्वनिमीलितानि नयनान्यभ्येति निद्रागमः ।
निद्रामुद्रितलोचने प्रतिगृहं मूकायमाने जने
निर्द्वन्द्वोच्चरदुच्चदर्दुररवैः कोलाहलिन्यो निशाः ॥

११४

धारानि[पात[1]]रवबोधितपञ्जरस्थ
दात्यूहडम्बरकरम्बितकण्ठकूजाः ।
श्चट्टेषु काण्डपटवारितशीकरेषु
धन्याः पिबन्ति मुखतामरसं वधूनाम् ॥

११५

शैलश्रेणिरपेतदावदहना द (fol. 21*b*) . . .[2] †टधनं†
जीमूताङ्कुरदन्तुरा दश दिशो भूरेणुमुक्तं नभः ।

---

११२ [1] Akṣaras omitted. [2] MS. ष. [3] MS. व. [4] MS. त्व?
११३ [1] MS. द्दि.
११४ [1] Akṣaras lost. [2] MS. सी.
११५ [1] MS. ०रचेरत०. [2] Akṣaras lost. [3] MS. न्त.

किं चान्यत्कलिकोर्मिमेदुरमुखी जाता कदम्बच्छवि
श्छिद्यन्ते कियता क्षणेन शिखिनां मौनव्रतग्रन्थयः ॥

११६

केदारे नव[1]वारिपूर्णजठरे किंचित्क्वणद्दर्दुरे
शम्बूकाण्डकपिण्डपाण्डरततप्रान्तस्थलीवीरणे ।
डिम्भा दण्डकपाणयः प्रतिदिशं पङ्कच्छटाचर्चिता
[3]श्वुंभ्रूश्वुभ्रूरिति भ्रमन्ति रभसादुद्यायिमत्स्योत्सुकाः ॥

११७

समन्ततोविस्फुरदिन्द्रनील
मणिप्रभाविच्छुरितान्तरालः ।
मर्त्यावतीर्णस्य विडोजसोऽयं
नीलांशुकच्छत्त्र[1]मिवाम्बुवाहः ॥

११८

खद्योतच्छुरितान्धकारपटलाः स्पष्टस्फुरद्विद्युतः *Skm. II. 82 (कस्यचित्
स्निग्धध्वा[1]नविभावितोरुजलदोन्नाहा रटत्कम्बवः ।
एता केतकभेदवासितपुरोवाताः पतद्वारयो
न प्रत्येमि जनस्य यद्विरहिणो यास्यन्ति सोढुं निशाः ॥

११९

एतस्मिन्मदजर्जरैरुपचिते कम्बूरवाडम्बरैः[1] *Skm. II. 80 (वातोकस्य
स्तैमित्यं मनसो दिशत्यनिभृतं धारारवे[2] मूर्छति ।

---

११६ [1] MS. वं. [2] MS. द्दि. [3] MS. स्व.
११७ [1] MS. त्त्र.
११८ [1] *Skm.* ध्या.
११९ [1] *Skm.* also °करा (B.). [2] *Skm.* °धरे.

उत्सङ्गे[1] ककुभो विधाय रसितैरम्भोमुचां घोरय
न्मन्ये मुद्रित[2]चन्द्रसूर्य[3]नयनं व्योमापि निद्रायते ॥

१२०

गम्भीराम्भोधराणामविरलनिपतद्वारिधारानिनादा
नीषन्निद्रालसाक्षा दृढगृहपटलारूढकुष्माण्डवल्श्याः[1]।
दोर्भ्यामालिङ्ग्यमाना जलधरसमये पत्त्रषण्डे निशायां
धन्याः शृण्वन्ति सुप्ताः स्तनयुगभरितोर . . . . . . ॥

१२१

. . . . . . . .

. . . . . . . .

. . . (fol. 23*a*) वोदये ऽद्य जलदव्यालो[ल]पुच्छच्छद
च्छन्त्व[1]च्छादितमौलयो[2] दिशि दिशि क्रीडालसाः केकिनः ॥

१२२

गायति हि नीलकण्ठो नृत्यति[1] गौरी तडित्तरलतारा।
आस्फालयति मृदङ्गं तदनु घनो ऽयं महाकालः ॥

१२३

अलकेषु चूर्णभासः स्वेदलवाभान् कपोलफलकेषु।
नवघनकौतुकिनीनां वारिकणान् पश्यति कृतार्थः ॥

---

११९ [1] *Skm.* also (A.). तत्संगे; MS. °ङ्के. [2] *Skm.* नि.
[3] MS. has मुद्रियते.
१२० [1] *Sic* MS. (or ह्यः ?).
१२१ [1] MS. न्त्व ? [2] MS. न.
१२२ [1] MS. ते (*ti*).

१२४

काले वारिधराणामपतितया नैव शक्यते स्थातुम् । *Sāhityad. p. 288 (anon.).*
उत्कण्ठितासि तरले न हि न हि सखि पिच्छिलः पन्थाः ॥

१२५

